भूशङ्कुघातः प्रभया विभक्तः
प्रजायते दीपशिखौच्चमेवम् ॥
त्रैराशिकेनैव यदेतदुक्तं
व्याप्तं स्वभेदैर्हरिणेव विश्वम् ॥

उदाहरणम् ।
शङ्कोर्भार्कमिताङ्गुलस्य सुमते! दृष्टा किलाष्टाङ्गुला
छायाग्राभिमुखे करद्वयमिते न्यस्तस्य देशे पुनः।
तस्यैवार्कमिताङ्गुला यदि तदा छायाप्रदीपान्तरं
दीपौच्चञ्च कियद्भवेदवहितं छायाभिधां वेत्सि
चेत् ॥

न्यासः




भूः १३/३ छा १/३ भूः २ छा १/२

अत्र छायाग्रयोरन्तरमङ्गुलात्मकम् । ५२ । छाये च । ८ । १२ । अनयोराद्या । ८ । दयमनेन । ५२ । गुणिता । ४१७ । छायाप्रमाणान्तरेण । ४ । भक्ता लब्धं भूमानम् । १०४ । इदं प्रथमच्छायाग्रदीपतलयोरन्तरमित्यर्थः । एवं द्वितीयच्छायाग्रमानम् ।१५६। भूशङ्कुघातः प्रभया विभक्त इति जातमुभयतोऽपि दीपौच्चं

सममेव हस्ताः ६ १/२ ।

एवमित्यत्र छायाव्यवहारे त्रैराशिककल्पनयानयनं वर्त्तते तद्यथा। प्रथमच्छायातो द्वितीयच्छाया। १२। यावताधिका तावता छायावयवेन यदि छायाग्रान्तरतुल्याभूर्लभ्यते तदा छायया किमिति एवं क्रमक पृथक् छायाप्रदीपतलान्तरप्रमाणं लभ्यते। ततो द्वितीयं त्रैराशिकं यदि छायातुल्ये भुजे शङ्कुः कोटिस्तदा भूतुल्ये भुजे किमिति लब्धं दीपकौच्चमुभयतोऽपि तुल्यमेव। एवं पञ्चराशिकादिकमखिलं त्रैराशिककल्पनयैव सिद्धं यथा भगवता श्रीनारायणेन जननमरणक्लेशापहारिणा निखिलजगज्जननैकबीजेन सकलभुवनभावनेन गिरिसरित्सुरनरासुरादिभिः स्वभेदैरिदं जगद्व्याप्तं तथेदमखिलं गणितजातं त्रैराशिकेन व्याप्तं यद्येवं तद्बहुभिः किमित्याशङ्क्याह।
यत्किञ्चिद्गुणभागहारविधिना बीजेऽत्र वा
गण्यते
तत् त्रैराशिकमेव निर्म्मलधियामेवावगम्यं
विदाम् ।
एतद्यद्बहुधास्मदादिजडधीधीवृद्धिबुद्धा बुधैस्तद्भेदान् सुगमान् विधाय रचितं प्राज्ञैः
प्रकीर्णादिकम् ॥"

इति श्रीभास्कराचार्य्यविरचितायां लीलावत्यां छायाधिकारः समाप्तिमगात् ॥

छायाभृत्, पुं, (छायां छायारूपम्मृगलाञ्छनं यद्वा छायां शीतलकान्तिं बिभर्त्तीति। भृ+क्विप्।) चन्द्रः। इति हेमचन्द्रः। २। १९॥

छायामित्रं, क्ली, (छायया छायाकरणेन मित्रमिव छायाया मित्रमिति वा।) छत्रम्। इति शब्दरत्नावली॥

छायामृगधरः, पुं, (छाया छायारूप एव मृगस्तं धरतीति। धृ+अच्। छायामृगस्य धरो वा।) चन्द्रः। इति त्रिकाण्डशेषः॥

छायासुतः, पुं, (छायायाः सूर्य्यपत्न्याः सुतः पुत्त्रः।) शनिः। इति हेमचन्द्रः। २। ३४॥

छिः, पुं, (छ्यति छिनत्ति कीर्त्त्यादिकं नाशयतीत्यर्थः। छो+बाहुलकात् किः।) गर्हा। इत्येकाक्षरकोषः॥

छिक्कनी, स्त्री, (छिक् इत्यव्यक्तक्षुतशब्दं कनयति। कन्+करणे अप् ततो ङीष्।) वृक्षविशेषः। छिक्कनी इति नाकछिक्नी इति हाँचोटी इति च भाषा॥ तत्पर्य्यायः। अवक्षुत् २ तिक्ता ३ छिक्किका ४ घ्राणदुःखदा ५। अस्या गुणाः। कटुत्वम्। रुच्यत्वम्। तीक्ष्णत्वम्। उष्णत्वम्। वह्निपित्तकारित्वम्। वातरक्तकुष्ठकृमिवातकफनाशित्वञ्च। इति भावप्रकाशः॥

छिक्का, स्त्री, (छिगित्यव्यक्तशब्देन कायतीति। कै+कः। ततष्टाप्।) क्षुतम्। इति शब्दरत्नावली॥ छिँक् इति हिन्दी भाषा॥ (यथा, गारुडे ज्योतिश्चक्रे ६० अध्याये।
"छिक्कायां लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम्।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात्॥
नैरृते शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत्।
ईशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम्॥")

छिक्किका, स्त्री, (छिक्का क्षुतं साध्यत्वेनास्त्यस्याः। बाहुलकात् ठन्।) छिक्कनी। इति भावप्रकाशः॥

छित्, [द्] त्रि, (छिनत्तीति। छिद्+क्विप्।) छेदनकर्त्ता॥

छितं, त्रि, (छायते स्मेति। छो+क्तः। "शाच्छोरन्यतरस्याम्।" ७।४।४१। इतीत्।) छिन्नम्। इत्यमरः।। ३। १। १०३॥

छित्तिः, पुं, (छिद्+क्तिन्।) करपत्त्रः। इति शब्दचन्द्रिका॥ छेदश्च॥

छित्वरः, त्रि, (छिनत्तीति। छिद्+"छित्वरच्छत्वरेति।" उणां। ३। १। इति ष्वरच् प्रत्ययेन निपातनात् साधुः।) छेदनद्रव्यम्। धूर्त्तः। वैरी। इत्युणादिकोषः॥

छिद, इर घ ञ औ छेदे। इति कविकल्पद्रुमः॥ (रुधां-उभं-सकं-अनिट्।) छेदो द्विधाकरणम्। इर्, अच्छिदत् अच्छैत्सीत्। घ ञ, छिनत्ति छिन्ते दात्रेण तृणं लोकः। औ, छेत्ता। इति दुर्गादासः।

छिदकं, क्ली, (छिनत्तीति। छिद्+क्वुन्।) वज्रम्। इत्युणादिकोषः॥

छिदा, स्त्री, (छिद्+"षिद्भिदादिभ्योऽङ्।" ३। ४। १०४। इत्यङ् ततष्टाप्।) छेदनम्। इति मुग्धबोधम्॥

छिदिः, स्त्री, (छिद्यतेऽनया इति। छिद्+"कृगृशृ-कुटिभिदिछिदिभ्यश्च।" उणां। ४। १४२। इति इः स च कित्।) कुठारः। इत्युणादिवृत्तिः॥

छिदिरः, पुं, (छिनत्त्यनेनेति। छिद्+"इषिमदिमुदिखिदिच्छिदीति।" उणां। १। ५१। इति किरच्।) करवालः। परश्वधः। पावकः। रज्जुः। इति मेदिनी। रे, १५५॥

छिदुरः, पुं, (छिनत्तीति। छिद्+"विदिभिदिच्छिदेः कुरच्।" ३।२।१६२। इति कुरच्।) छेदनद्रव्यम्। धूर्त्तः। वैरी। इति मेदिनी। रे, १५६॥ (स्वयं छिन्ने, त्रि। यथा, रघुः। १६।६२।
"संलक्ष्यते न छिदुरोऽपि हारः॥")

छिद्र, त् क भेदे। इति कविकल्पद्रुमः॥ (अदन्त-चुरां-परं-सकं-सेट्।) भेद इह रन्ध्रकरणम्। छिद्रयति छिद्रापयति भाण्डं बालकः। इति दुर्गादासः॥

छिद्रं, क्ली, (छिद्यते भिद्यते यत्। छिदिरौ छेदने+"स्फायितञ्चिवञ्चीति।" उणां। २।१३। इति रक्।) भेदः। छेँदा इति भाषा। तत्पर्य्यायः। कुहरम् २ शुषिरम् ३ विवरम् ४ बिलम् ५ निर्व्यथनम् ६ रोकम् ७ रन्ध्रम् ८ श्वभ्रम् ९ वपा १० शुषिः ११। इत्यमरः। १। ८। २॥ खभ्रम् १२ शुषी १३। इति तट्टीका॥ (यथा, महाभारते। ३।८२।५३।
"ततो गच्छेत धर्म्मज्ञ! हिमवत्सुतमर्व्बुदम्।
पृथिव्यां यत्र वै छिद्रं पूर्व्वमासीत् युधिष्ठिर!॥")
दूषणम्। इति मेदिनी। रे, ३८॥ (यथा, महाभारते। २। १२। २९।
"बहुविघ्नश्च नृपते! क्रतुरेष स्मृतो महान्।
छिद्राण्यस्य तु वाञ्छन्ति यज्वघ्ना ब्रह्मराक्षसाः॥"
अवकाशः। नवमसंख्या। इति ज्योतिषम्॥ लग्नादष्टमस्थानम्। "छिद्राख्यमष्टमं स्थानमिति।" इति ज्योतिस्तत्त्वम्॥)

छिद्रवैदेही, स्त्री, (छिद्रप्रधाना वैदेही पिप्पली।) गजपिप्पली। इति राजनिर्घण्टः॥

छिद्रान्तः, [र्], पुं, (छिद्रमन्तर्मध्ये यस्य।) नलः। इति राजनिर्घण्टः॥

छिद्राफलं, क्ली, (छिद्रं दूषणमाफलतीति। आ+फल+अच्।) मायाफलम्। इति राजनिर्घण्टः॥

छिद्रितः, त्रि, (छिद्र+क्तः।) कृतच्छिद्रः। तत्पर्य्यायः। वेधितः २ विद्धः ३। इत्यमरः। ३। १। ९९॥

छिन्नं, त्रि, (छिद्यते स्म इति। छिद्+क्तः।) कृतच्छेदनम्। छेँड़ा इति काटा इति च भाषा। तत्पर्य्यायः। छातम् २ लूनम् ३ कृत्तम् ४ दातम् ५ दितम् ६ छितम् ७ वृक्णम् ८। इत्यमरः। ३।१।१०३॥ कृष्टम् ९ छादितम् १०। इति जटाधरः॥ छेदितम् ११ खण्डितम् १२। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। ९०। ११।